Lokadarpana
Vol. VI, No. 1, 123-136, April, 2026
Pandit Shree Lokanath Luitel Smriti Pratishthan, Dharan

# न्यायवैशेषिकोभयदर्शनगतसाम्यविषयाः

**बाबुराम आचार्यः***
baburamacharya87@gmail.com

Received Date: February 15, 2026 - Accepted Date: March 28, 2026

**लेखसारः**

प्रस्तुतोऽयं लेखः पौरस्त्यदर्शने किन्नाम न्यायदर्शनम् ?, किञ्च वैशेषिकदर्शनम् ?, उभयोर्न्यायवैशेषिकोभयदर्शनयोः समानतन्त्रत्वं कथं सिद्ध्यति ?, न्यायवैशेषिकोभयदर्शनगतसाम्यभावापन्ना विषयाः के ? इत्यादिविषयविश्लेषणे केन्द्रितोऽस्ति। अत्रालेखे न्यायवैशेषिकदर्शनयोः परिचयपूर्वकं तद्दर्शनगतसाम्यभावापन्नविषयप्रतिपादनपुरस्सरं तौलनिकमनुशीलनं विहितमस्ति। संस्कृतसाहित्ये तत्रापि दार्शनिकक्षेत्रे न्यायवैशेषिकदर्शनयोः स्थानं विशिष्टं वर्तते। तत्र काणादं पदार्थशास्त्रञ्चेद् गौतमीयं तु प्रमाणशास्त्रमित्यनयोः सर्वशास्त्रोपकारकत्वात् सुप्रसिद्धे इमे संस्कृतसाहित्येऽनितरसाधारणतया च विद्येते। अनेनानुसन्धानमूलकनिष्कर्षेण गौतम–काणादशास्त्रजिज्ञासूनां कृते न्यायवैशेषिकदर्शनयोः परिचयपुरस्सरं न्यायवैशेषिकोभयदर्शनगतसाम्यविषयावबोधाय तत्स्वरूपज्ञानाय चोपयोगिता भवतीति विश्वसिमि।

**शब्दकुञ्जी :** अपवर्गः, आत्मा, आरम्भवादः, साम्यम्, सृष्टिसंहारप्रक्रिया।

## विषयपरिचयः

अध्यात्मविद्याभूतवैदिकदर्शनेषु न्यायवैशेषिकदर्शनयोः प्रमुखं स्थानं वर्तते। वस्तुतस्तु वैदिकधर्मस्य स्वरूपप्रतिपादनार्थं न्यायवैशेषिकोभयदर्शनेऽत्यन्तमुपयोगिनी विद्येते। तत्र महर्षिवात्स्यायनः प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्...इत्याद्युक्त्वाऽऽन्वीक्षिक्याः महिमानं स्वविरचितन्यायसूत्रभाष्ये गीतवान्

* उपप्राध्यापकः, विश्वविद्यालयविद्यापीठस्य नेपालसंस्कृतविश्वविद्यालयान्तर्गतस्य बेलझुण्डीदाङस्थस्य

चेत् काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमित्याभाणकं प्रायः सर्वेऽपि पौरस्त्यपाश्चात्त्यदर्शनानुयायिनः संस्कृतज्ञा जानन्त्येव। अत्रालेखे न्यायवैशेषिकदर्शनपरिचयस्तद्गतसाम्यविवेचनं क्रियते। इममेव विषयमाधृत्यालेखे सप्रमाणं तत्तद्विषया आलोड्यन्ते।

न्यायवैशेषिकदर्शनगतसाम्यविषयकं विश्लेषणं नैकविधैः पण्डितैः कृतं लभ्यते, अथापि न्यायवैशेषिकोभयदर्शनगतसाम्यविषयपरिशीलनक्रमे तत्र विदुषां मतभेदविषयकं तत्तात्पर्यञ्च न परिशीलतं दृश्यते। अत्रालेखे समस्याद्वयं प्रदर्श्यते –

(क) न्यायवैशेषिकोभयदर्शनयोः समानतन्त्रत्वं कथं सिद्ध्यति ?

(ख) न्यायवैशेषिकदर्शनसाम्यविषयाः के के ?

न्यायदर्शनदृष्ट्या वैशेषिकदर्शनदृष्ट्या च दर्शनद्वयगतसमानतन्त्रविषये अथ च दर्शनद्वयगतसाम्यविषये विवेचनमेव प्रस्तुतस्य शोधलेखस्योद्देश्यं वर्तते। तत्रोद्देश्यन्तु यथा –

(क) न्यायवैशेषिकोभयदर्शनयोः समानतन्त्रत्वप्रतिपादनम्।

(ख) न्यायवैशेषिकदर्शनसाम्यविषयविश्लेषणमिति।

दर्शनक्षेत्रे न्यायवैशेषिकदर्शनगतसाम्यविषयाः प्राक्तनार्वाक्तनैः पौरस्त्यपाश्चात्त्यदार्शनिकैस्तत्र तत्र ग्रन्थेषु विश्लेषिताः सन्ति, तथापि न्याय–वैशेषिकदर्शनयोः साम्यमित्यत्र न तावच्चिन्तितं वर्तते यथापेक्ष्यते। आनन्दझामहोदयेन *पदार्थशास्त्र* (सन् १९६५) इत्याख्यग्रन्थे वैशेषिकदर्शनगतसप्तपदार्थानामतिगहनरूपेण चिन्तनं विहितन्तथापि तत्र न्यायदर्शनगतसाम्यविषयाणामान्तं चिन्तनं नैव कृतं दृश्यते। तत्साम्यविषयप्रतिपादनार्थं मम प्रवृत्तिर्जाता। श्रीनारायणमिश्रेण *वैशेषिकदर्शन एक अध्ययन* (सन् १९६८) इत्याख्ये वैशेषिकदर्शनविश्लेषणात्मकग्रन्थे विवृतं वर्तते यत् परमेश्वरस्य सृष्टिविषयकेच्छातो जीवानामदृष्टसापेक्षादात्मपरमाणुसंयोगादुत्पन्नातो वायवीयपरमाणुगतक्रियातो द्व्यणुकत्र्यणुकचतुरणुकादिक्रमेण महावायुरुत्पद्यते। ततश्च तेनैव क्रमेण पृथिवीजलतेजसामुत्पत्तिर्जायत इति। परन्तु महोदयेन वस्तुतस्तेषां जगन्मूलकारणीभूतानां पार्थिवादिपरमाणूनां किंस्वरूपम् ? कथञ्च तेभ्यः सृष्टिरित्यादिविषये न याथातथ्येन वर्णितं वर्तते। अतः न्यायवैशेषिकोभयदर्शनगतसाम्यविषयेषु परमाणुस्वरूपं तस्य प्रयोजनञ्च किमिति विषयप्रतिपादनार्थं मे प्रवृत्तिः। महामहोपाध्यायफणिभूषणतर्कवागीशमहोदयेन *न्याय–परिचय* (सन् १९६८) इति न्यायदर्शनपरिचयात्मके ग्रन्थे न्यायवैशेषिकदर्शने परमाणुवाद आरम्भवादश्च स्वीक्रियत इत्युल्लिखितोऽस्ति। तेन चाग्रे विव्रियते – कणादापेक्षायां गौतममुनिर्विस्पष्टतया परमाणोर्नित्यत्वम्, आरम्भवादञ्च स्वीकरोतीति। अत्र फणिभूषणमहोदयेन यदुल्लिखितं तज्जगत्सृष्टिविषयकमिति आरम्भवादविवरणेन ज्ञायते। परन्तु तत्र महोदयेन न्यायवैशेषिकाभिमतजगदुत्पत्तिविषये न विस्तृततया विवृतं न वा तत्प्रकारः कारणञ्च विवृतमिति। वैकुण्ठघिमिरेमहोदयेन *वात्स्यायनप्रशस्तपादभाष्ययोः तुलनात्मकमध्ययनम्* (सन् २०१०) इत्याख्येऽप्रकाशितविद्यावारिधिशोधप्रबन्धेऽत्यन्तगहनतया वात्स्यायनकृतन्यायभाष्यस्य प्रशस्तपादकृतप्रशस्तपादभाष्यस्य च तौलनिकमध्ययनं विहितमस्ति। तत्र च घिमिरेमहोदयेन न्यायवैशेषिकसम्बद्धयोरुभयोर्ग्रन्थयोर्विद्यमानाः साम्यवैषम्यविषयाः प्रतिपादिताः।

तथा सत्यपि तत्र तेन समग्रन्यायवैशेषिकदर्शनसम्बद्धयावद्विषया नैवालोडिता अपि तु ग्रन्थद्वये स्थिता विषया एव प्रतिपादिताः। अतो न्यायवैशेषिकदर्शनगतसमग्रसाम्यविषया अपि आगच्छेयुरिति धिया मम प्रवृत्तिर्जाताऽत्र लेखे। एवमेव रघुनाथनेपालमहोदयेन *न्यायवैशेषिकाभिमतप्रमाणानां तुलनात्मकमध्ययनम्* (सन् २०१३) इत्याख्येऽप्रकाशितशोधप्रबन्धे न्यायवैशेषिकाभिमतयावत्प्रमाणानां न्यायवैशेषिकेतरदर्शनगतप्रमाणानामपि विशदव्याख्यानं विहितं दृश्यते। तत्र नेपालमहोदयेन न्यायवैशेषिकोभयदर्शनगतप्रमाणानां तौलनिकमध्ययनमपि कृतमस्ति। परं तेन विदुषा केवलं न्यायवैशेषिकप्रमाणगतसाम्यवैषम्यविषया उपस्थापिता न तु दर्शनद्वयगतसमग्रसाम्यविषयाणाम्। अतोऽत्रालेखे न केवलं प्रमाणानि प्रतिपाद्यन्ते अपितु न्यायवैशेषिकदर्शनगतसमग्रसाम्यविषयाः प्रतिपाद्यन्ते। तेन च दर्शनद्वयगतसाम्यविषयावबोधने सारल्यं भवेदिति। एवञ्च न्यायवैशेषिकदर्शनयोस्तौलनिकपर्यालोचनदृष्ट्या तु न तावत् प्रायश्चिन्तनं जातं वर्तते। अतो नूनमयं विषयो मत्कृतेऽनुसन्धेयार्हो भवतीति विचिन्त्यास्मिन् न्यायवैशेषिकोभयदर्शनगतसाम्यविषयानुशीलनमिति शीर्षके प्रवृत्तिर्मम जाता। अतश्च निर्मास्यमाने लघ्वालेखे नैकेषां प्राच्यवप्रतीच्योभयविधानां प्राचीनार्वाचीननूतनानां विपश्चितानामनेकविधानां सिद्धान्तानां प्रयोगं विधाय न्यायवैशेषिकदर्शनयोः साम्यभावापन्नविषयाणां तौलनिकं विश्लेषणं समीक्षणञ्च विधास्यते।

## अध्ययनविधिः

इदमनुसन्धानं मूलतः पुस्तकादिसामग्रीतः कृतमस्ति। अत्र प्रमुखतया न्यायवैशेषिकग्रन्थतस्तत्सम्बद्धेभ्योऽन्यपुस्तकादिभ्यो यथावश्यकं सामग्रीः सङ्कलनं विधाय विश्लेषणीकृत्य चैवमांशिकरूपेण न्यायवैशेषिकदर्शनविज्ञैः सह संवादादिकं विधाय निष्कर्षः स्थापितोऽस्ति।

## सैद्धान्तिकाधारः

अत्रालेखे न्यायवैशेषिकदर्शनसामान्यपरिचयस्तद्दर्शनगतसाम्यविषयाः प्रतिपाद्यन्ते। अत एवात्र न्यायवैशेषिकदर्शने द्व एव सैद्धान्तिकाधारौ वर्तेते। तत्र च न्यायसूत्राणि सूत्रगतास्तदीया अनेके व्याख्याग्रन्थाः टीकोपटीकाग्रन्थास्तदनु वैशेषिकसूत्राणि सूत्रगतास्तदीया अनेके व्याख्याग्रन्थाष्टीकोपटीकाग्रन्थाः(न्यायवैशेषिकोभयदर्शनसम्बद्धग्रन्थाः) कोशादिग्रन्थाश्चास्यानुसन्धानस्य सैद्धान्तिकाधारत्वेन स्वीक्रियन्ते। अनुसन्धानात्मकलेखस्वरूपनिर्माणक्रमे आधारसन्दर्भप्रदर्शनाय गद्यात्मककृतीनां कृते विश्वप्रचलिताया लेखक–मिति–पद्धतेः (एपीएपद्धतेः) प्रयोगः क्रियते। सूत्रसन्दर्भप्रदर्शनाय संस्कृतवाङ्मयान्तर्गते न्यायशास्त्रे वैशेषिकशास्त्रे च मौलिकपद्धतिरूपेण बहुप्रचलिताया अध्याय–आह्निक–सूत्रसंख्यापद्धतेश्च प्रयोगः क्रियते।

## विश्लेषणप्रक्रिया

अत्रानुसन्धानक्रमे सर्वप्रथमं न्यायवैशेषिकदर्शनसामान्यपरिचयस्तद्दर्शनगतसाम्यविषयाश्चीयन्ते। प्रसङ्गेऽत्र न्यायवैशेषिकदर्शनस्थसमस्तविषयाणां चर्चा जटिलेति मत्वा सङ्क्षेपेण न्यायवैशेषिकोभयदर्शनगतसाम्यविषयाणामेव चर्चा विधीयते। उक्तप्रसङ्गे ह्यागतानां पौरस्त्यपाश्चात्त्यदर्शनसम्बद्धविषयाणामपि चर्चानिवार्यत्वेनोपस्थाप्यते। एषैवास्यालेखस्य विश्लेषणप्रक्रिया वर्तते। न्यायवैशेषिकदर्शनसामान्यपरिचयस्तद्दर्शनगतसाम्यविषयाणामध्ययनमेवास्य लेखस्य प्रमुखं क्षेत्रं वर्तते। महर्षिगौतमप्रणीतन्यायसूत्रेषु

महर्षिकणादप्रणीतवैशेषिकसूत्रेषु च नानाविधा विषया वर्तन्ते परन्त्वस्मिन् लघ्वालेखे विस्तरभयात् तदवान्तरविषयाणां विश्लेषणं न क्रियते, किन्तु मूलभूता न्यायवैशेषिकोभयदर्शनगतसाम्यविषयाणामेव प्रतिपादनमेव क्रियते।

**दर्शनपरिचयः**

संस्कृतवाङ्मये पौरस्त्यदर्शनस्य विशिष्टं स्थानं वर्तते। पौरस्त्यदर्शनस्यास्य मूलं कृत्यन्तु सत्यान्वेषणं वर्तते। दर्शनस्यास्यातिव्यापकत्वाच्चिन्तनान्यप्यनेकविधानि वर्तन्ते। तत्र विद्यमानानां चतुर्दशविद्याना मुताहोऽष्टादशविद्यानाञ्च चर्चा तत्तच्छास्त्रेषु गूढं निगदितमस्ति। ताश्चतुर्दशविद्या अथ चाष्टादशविद्या विष्णुवायवीयादिपुराणेषु महाभारते चापि निगदिता वर्तन्ते। विष्णुपुराणे यथा –

अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्रञ्चतुर्थञ्च विद्या ह्यष्टादशैव तु (विष्णुपुराणम् ३।६।२८–२९) ॥

यो मार्गो मूलं तत्त्वमन्वेष्टुं प्रयतते, स मार्गः पौरस्त्यजगति दर्शनमिति पदेनोच्यते। दृश्यते इति दर्शनमिति भावव्युत्पत्त्या अनुभव एव दर्शनमित्यर्थः। दृश्यते अनेनेति करणव्युत्पत्त्या तु येनानुभवः प्राप्यते, तदपि दर्शनं भवति। संस्कृतवाङ्मये न्यायशास्त्रस्य वैशेषिकशास्त्रस्य चातीव महत्तरं स्थानं वर्तत इति तु जानीम एव। तत्रादौ संस्कृतवाङ्मये षड् वैदिकदर्शनानि, त्रीणि चावैदिकदर्शनानि सन्ति। तत्र किञ्चन चार्वाकदर्शनमस्ति देवगुरुबृहस्पतिप्रणीतमवैदिकदर्शनम्, बुद्धेनोपदिष्टं बौद्धदर्शनमप्यवैदिकम्, जैनदर्शनन्तु महावीरेण प्रणीतं तदप्यवैदिकमेव। ये वेदप्रामाण्यं नाभ्युपगच्छन्ति ते नास्तिकाश्चेद् वेदशास्त्रं सुतरामभ्युपगच्छन्ति ते आस्तिकाः। इदमत्र पृथक्चिन्तनमपि श्रूयते यद् वैदिकदर्शनानि तु षडेव परन्तु समानतन्त्रत्वेन स्वीकृते सति तु वैदिकदर्शनानि सांख्य–न्याय–मीमांसाभेदात् त्रीण्येवेति। एवमाहत्य षड्दर्शनानि सम्पन्नान्यर्थात् त्रीणि वैदिकदर्शनानि त्रीणि चावैदिकदर्शनानि। परमेतत्तु केषाञ्चन दार्शनिकानां मतमस्ति न तु सर्वेषाम्। परमधिकस्थलेषु षड् वैदिकदर्शनानामेव प्रख्याततत्वात् षडेव वैदिकदर्शनान्यवबोद्धव्यानि। तत्र कपिलस्य कणादस्य गौतमस्य पतञ्जलेः। व्यासस्य जैमिनेश्चैव दर्शनानि षडेव हि इति श्लोकानुसारेण कपिलस्य दर्शनं कापिलम्, कणादस्य दर्शनं काणादम्, गौतमस्य दर्शनं गौतमदर्शनम्, पतञ्जलेर्दर्शनं योगदर्शनम्, व्यासस्य दर्शनं वेदान्तदर्शनम्, जैमिनेर्दर्शनं पूर्वमीमांसादर्शनमिति षड् दर्शनानि लोके प्रसिद्धानि। तत्र सांख्यदर्शनं द्विविधम्, सेश्वरं निरीश्वरञ्च। तत्र सेश्वरसांख्यं योगदर्शनम्, निरीश्वरसांख्यञ्च सांख्यमित्येवोच्यते। वैदिकदर्शनानि तावन्न्यायवैशेषिकम्, सांख्ययोगः, पूर्वोत्तरमीमांसा चेतिभेदात् सामान्यतः प्रत्येकं वर्गे स्थापितानि सन्ति। प्रकृतप्रसङ्गे न्यायदर्शनवैशेषिकदर्शने एकस्मिन्नेव वर्गे स्थापिते इति कारणतो न्यायवैशेषिकमिति नाम ख्यातम्। न केवलमेकस्मिन् वर्गे स्थापिते उभेऽपि न्यायवैशेषिकदर्शने, अपितु एते खलु समानव्यवस्थारूपेण दृश्येते। अर्थादेकेन दर्शनेन स्वीकृताः प्रायो विषया अपरदर्शनेनापि स्वीक्रियन्त इति कारणतस्ते समानतन्त्रत्वेन स्थापिताः। अर्थात् केषुचन विषयेषु भेदेषु सत्स्वपि ते परस्परं सामान्यसिद्धान्तानुपस्थापयतः। अत एव दर्शनद्वयमिदं समानतन्त्रत्वेन परिगणितम्। समानतन्त्रत्वादधिको

भेदो नास्ति, अत्यन्तं नैयून्येनैव दर्शनद्वये वैषम्यविषया वर्तन्त इति विवेकः।

ननु आदावेव न्यायवैशेषिकोभयदर्शनयोर्बहुषु स्थलेषु समानतन्त्रत्वान्न्यायो वैशेषिको वा दर्शनमित्येकमेव नाम भवतु, न्यायो वैशेषिकञ्चेति दर्शनद्वयं किमर्थमिति चेन्न, दर्शनयोरुभयोः समानतन्त्रत्वे सत्य प्यन्यवैदिकदर्शनापेक्षयातिनैयून्येन वैषम्यभावापन्नविषयाणां विद्यमानत्वात्। अस्यायं भावो यत् समानतन्त्रत्वमुभयोर्दर्शनयोः स्वीकृते सत्यपि प्रायो अतिन्यूनेषु स्थलेष्वेव वैषम्यभावापन्नविषयाणां बाहुल्याद् दर्शनद्वयस्य स्वीकारोऽपरिहार्यो जातः। अतो न्यायो वैशेषिकञ्चेति दर्शनद्वयं पृथक्त्वेन स्वीकृतो न त्वेकत्वेनैव। तथा चास्मिन्नालेखे विस्तरभयाल्लेखशीर्षकानुसारं न्यायवैशेषिकोभयदर्शनगतसाम्यविषया णावेव चर्चा विधीयमाना वर्तते।

**न्यायदर्शनम्**

दर्शनं नामात्र तत्त्वसाक्षात्काररूपज्ज्ञानम्। आध्यात्मिकशास्त्रे आत्मविषयकं चिन्तनन्तु क्रियत एव, तथापि तर्कशास्त्रे न केवलमात्मतत्त्वस्य ज्ञानं पर्याप्तम्, तदतिरिक्तानां सांसारिकपदार्थानामपि बोधो नितरामावश्यको जायते। नेति नेतिमार्गेण त्याज्यत्वेन वाऽऽत्मेतरबाह्यपदार्था अपि ज्ञेया भवन्ति। तदर्थञ्च शास्त्राणि प्रवर्तन्ते शास्त्रजिज्ञासवश्च तथा। एतानि च वैदिकशास्त्राणि न्याय–वैशेषिक–सांख्य–योग–मीमांसा–वेदान्तभेदात् षड्दर्शनत्वेन सुप्रसिद्धानि। तत्र महर्षिगौतमस्तावत् प्रमाणद्वारा जगद्विश्लेषणं करोति, अतस्तेन महर्षिगौतमेन प्रवर्तितस्य न्यायदर्शनस्य प्रमाणदर्शनम्(विद्या)इति। नि–उपसर्गपूर्वकाद् इण्धातोर्घञि प्रत्यये कृते सति न्यायशब्दो निष्पद्यते। न्यायपदस्यार्थस्तु नियमेन ईयते इति न्यायः, नीयन्ते प्राप्यन्ते विवक्षितार्था येनेति वा न्यायः। अर्थाद् येन शास्त्रेण विवक्षितार्थसिद्धिः प्राप्यते, स न्याय इत्यर्थो निर्गलितः। गौतमः, वात्स्यायनः, उद्योतकरः, वाचस्पतिमिश्रः, उदयनाचार्यः, जयन्तभट्ट इत्यादयः प्राचीना ऋषयो न्यायशास्त्रप्रवर्तकाः। नव्यन्यायप्रवर्तकाश्च गङ्गेशोपाध्याय–रघुनाथ–जगदीश–मथुरानाथतर्कवागीश–विश्वनाथप्रभृतयः। तत्र न्यायदर्शनस्य व्यापकोऽर्थो विविधप्रमाणसाहाय्येन वास्तविकतायाः परीक्षणम्, प्रमाणस्वरूपस्य वर्णनम्, परीक्षणव्यवस्थाया व्यावहारिकरूपस्य प्रकटीकरणं चास्ति। न्यायस्यापरं नामाऽऽन्वीक्षिकी, यस्यार्थो यथार्थान्वेषणेन प्रारब्धं ज्ञानमिति। प्रत्यक्षाश्रितानुमानं प्रत्यक्षशब्दप्रमाणसाहाय्येन ज्ञातविषयविश्लेषणम्, तदनन्तरं पर्यालोचनम्, अन्वेषणमाध्यमेन च प्रवृत्तत्वान्न्यायविद्या आन्वीक्षिकीति स्पष्टम्। वस्तुतो भारतीयदर्शने(साहित्ये) न्यायदर्शनस्यामूल्यं योगदानं शास्त्रीयविश्लेषणपद्धत्यैव वर्तते। न्यायेन विस्तृतव्याख्यानेन प्रमाणविश्लेषणेन चाविष्कृताः सिद्धान्ता नव्यन्यायगतपद्धतिश्चान्यैर्दर्शनैरपि स्वशास्त्रेषु प्रयुक्ताः सन्ति। न्यायदर्शनस्य तार्किकविधिर्गभीरा प्रशंसनीया च वर्तते। न्यायविद्या न्यायशास्त्रं वेतस्यापरं नाम। तस्यावगमनाय तया प्रकाशितानां सर्वविधविषयाणां ज्ञानमावश्यकम्। हेतुविद्या, हेतुशास्त्रम्, युक्तिविद्या, युक्तिशास्त्रम्, प्रमाणशास्त्रमित्यादीनि शास्त्रस्यास्य पर्यायाः सन्ति। अत्रानुमानप्रधानत्वाद्, हेतोश्चानुमाने मुख्यघटकत्वाद् हेतुविद्येति। एवञ्च तर्कस्यापि व्यापकविमर्शत्वादत्र तर्कशास्त्रमिति। अतस्तर्कशास्त्रं वा युक्तिशास्त्रं वेति पदमपि युज्यते। वस्तुतो न्यायदर्शनेन प्रमाणद्वारोद्देशलक्षणपरीक्षाभिः प्रमेया विविच्यन्ते, अतः प्रमाणशास्त्रमित्युच्यते। तत्र महर्षिगौतमप्रणीतं न्यायदर्शनं प्रमाणादिषोडशपदार्थ तत्त्वज्ञानाय विशेषतः प्रतिपादितत्वात् प्रमाणशास्त्रमित्यपरनाम्ना निगद्यते। महर्षिवात्स्यायनो न्यायभाष्ये

प्रमाणैरर्थपरीक्षणं न्यायः (न्यायदर्शनम्, सन् १९८६, पृ. १) इत्युक्त्वा प्रमाणशास्त्रस्य प्रामाणिकत्वं स्फुटीकरोति। नीयते = प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्याय इति न्यायपदस्य लौकिकविग्रहः। अस्य दर्शनस्यान्यान्यपि बहूनि नामानि सन्ति। यथा – न्यायविद्या, आन्वीक्षिकी, तर्कशास्त्रम्, गौतमशास्त्रम्, हेतुविद्या इत्यादीनि। वेदान्तविद्याया अध्यात्मविद्यामात्रत्वाद् गौतमप्रतिपादितप्रमाणादिषोडशपदार्थानां न केवलमध्यात्मविद्यात्वमपितु लौकिकप्रयोजनाय वादजल्पवितण्डादिषूपयुक्तत्वाल्लोकोपकारित्वमपि सञ्जातम्। अतोऽस्या विद्याया लौकिकविद्यात्वमप्यवगम्यते। दर्शनस्यास्य महिमानं प्रतिपादयन् महर्षिवात्स्यायनोऽवादीत् –

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ॥ (न्यायदर्शनम्, सन् १९८६,पृ.८)।

**वैशेषिकदर्शनम्**

यथा न्यायदर्शने प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयमित्युक्तं तद्भिन्नतया वैशेषिकदर्शने द्रव्यादिषट्पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसमुक्तमस्ति। विदितमेव समेषां यत् *काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमित्या*भाणकं तर्कव्याकरणोभयशास्त्रस्य महत्त्वं प्रतिपादयति। तत्र निर्दिष्टं काणादपदं वैशेषिकदर्शनं ज्ञापयति। महर्षिणा कणादेन प्रवर्तितत्वाद्दर्शनमिदं काणादम्। वैशेषिकदर्शनस्य सांख्यमीमांसावेदान्तदर्शनेषु चर्चितत्वाद्दर्शनमिदं प्राचीनं वर्तते। यथा – *न वयं षट्पदार्थवादिनो वैशेषिकादिवत्* (सांख्यसू.१।२५), *महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्* (ब्र.सू.२।२।१०) तथा कर्मैके तत्र दर्शनात् (मी.सू. १।१।६) इति सूत्राणि प्रमाणाण्यत्र। नित्यद्रव्याणां परस्परं भेदसाधनाय विशेषस्यातिरिक्तपदार्थस्वीकाराद् वैशेषिकनाम्ना ख्यातमिदं दर्शनम्। तत्र विशेषपदार्थस्त्वन्तेऽविभाज्यरूपेणावशिष्यते। दर्शनेऽस्मिन् पदार्था अतिसूक्ष्मरूपेण विविच्यन्ते। *नैयायिकेभ्यो द्रव्यगुणादिसामग्र्या विशिष्टमिति वैशेषिकम्* (नारायणमिश्रकृतप्र.पा.भा.प्रस्तावना, पृ.१०) अर्थान्नैयायिकाभिमतषोडशपदार्थापेक्षया द्रव्यगुणकर्मसामान्यविशेषसमवायाभावपदार्थरूपसामग्रीभिर्विशिष्टत्वाद् वैशेषिकमित्यप्युच्यते। येषां वस्तूनां व्यवच्छेदः साधर्म्यवैधर्म्यतया सम्भवति, तदपि वैशेषिकमिति। फलतो वैशेषिकनामकथने विशेषपदार्थस्य प्राधान्याद् वैशेषिकमिति नाम सञ्जातम्।

इदं वैशेषिकदर्शनं पदार्थविषयकविश्लेषणे महत्त्वपूर्णं स्थानं लभते। उलूकरूपधारकमहेश्वरभगवत्कृपाकटाक्षादागतं शास्त्रमौलूक्यमित्यपि पण्डिताः कथयन्ति। *ज्ञानादेव हि कैवल्यम्, ऋते ज्ञानान्न मुक्तिः* इत्यादिश्रुतिवचनानि ज्ञानमेव मुक्तौ हेतुरिति प्रतिपादयन्ति। दुःखपङ्कनिमग्नजीवोद्धारार्थं प्रवर्तितमिदं वैशेषिकदर्शनम्। स्वयं महर्षिः कणादो महेश्वरप्रसादात् सूत्राणि व्यरचयत्। तत्र द्रव्यादिषट्पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानान्निःश्रेयसं लभ्यत इति तु सूत्रकारेण स्पष्टतया निगदितम्। प्रमेयशास्त्रं वैशेषिकदर्शनम्, यत्र द्रव्य–गुण–कर्म–सामान्य–विशेष–समवायाभावानां सप्तपदार्थानां विवेचनं क्रियते। द्रव्य–गुण–कर्म–सामान्य–विशेष–समवाया भावपदार्थाश्चेदभावस्तु तद्भिन्नपदार्थः।

कणादानन्तरकालिकलौगाक्षिभास्कर–उदयनाचार्यप्रभृतिभिः पण्डितैर्दर्शनेऽस्मिन्

अभावपदार्थस्वीकारात् सप्तपदार्थतत्त्वज्ञानान्निःश्रेयसमिति विषयोऽप्यागतो यथोत्तरवैशेषिकदर्शने। वैशेषिकदर्शनमिदं पदार्थशास्त्रम्। दर्शनेऽस्मिन् सोद्देशलक्षणपरीक्षाभिर्द्रव्यादिसप्तपदार्थानां प्रतिपादनं सुष्ठु कृतमस्ति। वि*शेषमधिकृत्य कृतो ग्रन्थ* इति व्युत्पत्त्या *अधिकृत्य कृते ग्रन्थे* (अष्टा.४।३।८७॥) इति पाणिनिसूत्रेण ठक्प्रत्यये, आदिवृद्धौ वैशेषिकशब्दो निष्पद्यते। विशेषस्य बलीयस्त्वादेव श्रीवल्लभाचार्येण श्लाघ्या विशेषस्थितिः (न्यायलीलावती,सन् १९९१,श्लो.२) इत्युक्त्वा दर्शनस्यास्य वैशिष्ट्यं प्रतिपादितमस्ति। *विशेष एव वैशेषिकः* अर्थात् सप्तपदार्थेषु विशेषपदार्थस्वीकाराद् वैशेषिकम्, दर्शनस्यास्य विशिष्टत्वाद्वैशेषिकः, सप्तपदार्थत्वेनाङ्गीकृता द्रव्यगुणकर्मसामान्यविशेषसमवायाभावा इत्येते विशेषा एवेति। द्रव्यगुणादिसामग्र्या विशिष्टमिति वैशेषिकम्। केषाञ्चित् पदार्थानां विशेषतः प्रतिपादनादपीदं वैशेषि कमस्तीत्यनेकव्युत्पत्तिभिर्वैशेषिकशब्दो निष्पद्यते। अतस्तादृशानां कठिनतमविषयाणां प्रतिपादकः पुरुषो वैशेषिकत्वेन परिगण्यते।

अथ च परमाणूनां परस्परभेदसाधनाय विशेषाख्यपदार्थस्य विशेषतो निरूपणादेव दर्शनस्यास्य नाम वैशेषिकमित्यागतम्। सृष्टिसंहारप्रक्रियायाञ्च मूलभूतसिद्धान्तत्वेन परमाणव एव गृहीता वर्तन्ते। वैशेषिकदर्शनस्य प्रणेता महर्षिकणादो यस्य काश्यप–उलूक–कणभुगादीनि नामान्यपि प्रसिद्धानि जातानि। सप्तत्युत्तरत्रिशतसंख्यात्मकानि वैशेषिकसूत्राणि दशसु अध्यायेषु विभक्तानि, यत्र प्रत्येकमध्यायेषु आह्निकद्वयं विद्यते। दर्शनेऽस्मिन् पदार्थविषयिणी चर्चोद्देशलक्षणपरीक्षामाध्यमेन विहिता वर्तते। न केवलमस्मिन् दर्शनेऽपितु समानतन्त्रत्वेन स्वीकृतस्य न्यायदर्शनेऽपीयं प्रणाल्यवलम्बिता वर्तते – *त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः, उद्देशो लक्षणं परीक्षा चेति* (न्यायदर्शनम्,सन् १९८६,पृ.११)। प्रमेयशास्त्राख्यवैशेषिकदर्शने द्रव्यादिसप्तपदार्थानां गहनतया विवेचनं विहितमस्ति।

इदमत्रावधेयम् – *धर्मविशेषप्रसूताद् द्रव्य–गुण–कर्म–सामान्य–विशेष–समवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्* (वै.सू.१।१।४॥) इति सूत्रे महर्षिकणादेन षडेव पदार्था निगदि ताश्चेदुत्तरकालिकैराचार्यैः कथं सप्तपदार्थाः प्रतिपादिता इति चेत्, तत्र महर्षिणा भावपदार्थत्वेन षडुक्ताः, यतो हि साधर्म्यवैधर्म्याभ्यां परीक्षा तु भावपदार्थानामेव सम्भवति न त्वभावस्य। तत्र महर्षिकणादेन अतिविस्तृतरूपेण गाम्भीर्येण चाऽभावपदार्थविषयकानुशीलनं नवमाध्याये विहितं वर्तते।

**न्यायवैशेषिकदर्शनस्थसाम्यभावापन्ना विषयाः**

**पदार्थः**

सर्वधर्माणामाश्रयत्वेनोपस्थितं न्यायदर्शनं प्रमाणमीमांसाशास्त्रञ्चेत् सर्वशास्त्रोपकारकत्वेनोपस्थितं वैशेषिकदर्शनं तत्त्वमीमांसाशास्त्रम्। तत्र तावन्न्यायशास्त्रे *प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवत र्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः* (न्या.सू.१।१।१) इति सूत्रोक्तप्रमाणादिषोडशपदार्थान्तर्भूतेषु प्रमेयेषु द्रव्यादिषट्पदार्थानन्तर्भावयति। एतत्सूत्रभाष्ये स्वयं न्यायभाष्यकारो वात्स्यायनः स्पष्टमुल्लिखति स्वग्रन्थे – *अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवा याः प्रमेयम्, तद्भेदेन चापरिसङ्ख्येयम्* (न्यायदर्शनम्, सन् १९८६,पृ.१९) अतो न्यायदर्शनापेक्षया प्राचीनेन

वैशेषिकदर्शनेन स्वीकृतद्रव्यादिषट्पदार्था न्यायदर्शनेनापि स्वीकृतत्वादथ च वैशेषिकदर्शनेन न्यायदर्शनोक्तप्रमाणादिषोडशपदार्थानां द्रव्यगुणकर्मसामान्यविशेषसमवायात्मकषट्पदार्थेषु समाहितत्वाद्दर्शनद्वयं समानतन्त्रत्वेन परिगणितमित्याद्यं प्रमाणम्।

न्यायदर्शनसम्मतप्रमाणादिषोडशपदार्थेषु द्रव्यादिसप्तपदार्थानामन्तर्भूतत्वमुपरि प्रतिपादितन्तथैव वैशेषिकदर्शनसम्मतद्रव्यादिसप्तपदार्थेषु प्रमाणादिषोडशपदार्थान्तर्गतत्वं प्रतिपादयन्ति वैशेषिकाः। *तत्र न्यायदर्शने आद्यपदार्थः प्रमाणम्, प्रत्यक्षं प्रतीन्द्रियकरणत्वात्तत् करणं द्रव्यपदार्थे आगतम्। अनुमित्युपमितिशाब्दज्ञाने ज्ञानरूपकरणत्वात् तेषां प्रमाणानां गुणपदार्थेऽन्तभावो भवति। आत्मादिद्वादशविधप्रमेयेष्वात्मशरीरेन्द्रियमनसां द्रव्यान्तर्गतत्वं सम्भवति। एवं प्रकारेण रूपादिपञ्चार्थानां बुद्धेश्च गुणपदार्थेऽन्तर्भावित्वं सुशकम्। प्रेत्यभावपदार्थस्य देहध्वंसरूपत्वादभावपदार्थे, फलदुःखयोर्गुणपदार्थे, एकविंशतिदुःखनाशात्मकस्य ह्यपवर्गस्याप्यभावपदार्थे, ज्ञानरूपत्वात्संशयस्य गुणे, प्रयोजनस्य गुणे, दृष्टान्तसिद्धान्तयोर्द्रव्ये, शब्दस्वरूपत्वात् प्रतिज्ञाद्यवयवपदार्थानां गुणे, तर्कनिर्णययोर्ज्ञानस्वरूपत्वाद् गुणे, वादजल्पवितण्डाच्छलजातीनां शब्दस्वरूपत्वाद् गुणे, तथा च हेत्वाभासमतिरिच्य द्वाविंशतिविधनिग्रहस्थानानां गुणे, हेत्वाभासस्य द्रव्येऽन्तर्गतत्वं भवतीति वैशेषिकाः प्रवदन्ति* (द्रव्यकिरणावल्याःविश्लेषणात्मकमध्ययनम्, सन् २०१०,पृ.१५) । तथा च द्रव्यादिसप्तपदार्थेषु षोडशपदार्थानामन्तभावः सम्भवतीति वैशेषिकाणामाशयो वर्तते। यद्यपि शास्त्रप्रतिपाद्यविषये सूत्रोद्देशप्रकरणे चानयोर्मतभेदो दृश्यते, तथापि तात्त्विकरूपेण प्रतिपाद्येषु पदार्थेष्वनयोः साम्यं वक्तुं शक्यते।

**सृष्टिसंहारप्रक्रिया**

न्यायवैशेषिकयोः सृष्टिसंहारौ स्वीकृतौ वर्तेते। न्यायवैशेषिकयोरुभयोर्यथाकालं संहारः सृष्टिश्चाभिमता। तत्र न्यायवैशेषिकोभयदर्शनाभिमतेषु पदार्थेषु सामान्यविशेषसमवायपदार्थानां नित्यत्वात्तेषामुत्पत्तिस्त्वसम्भवा। एवमेव द्रव्येषु चाकाशकादिगात्ममनसां नित्यत्वादुत्पत्तेः कथा निरस्ता एव। परन्तु पृथ्व्यप्तेजोवायुगतपरमाणूनां सङ्घटनं संसारोत्पत्तिश्चेत्तेषां विघटनं संसारोन्नाशः। अत्र संहारपदेनाऽऽन्तं विघटनं ज्ञेयम्। तादृशविघटनानन्तरं जायमानोत्पत्तिः सृष्टिपदेन ज्ञाप्यते। तत्र वैशेषिकदर्शनस्य सृष्टिप्रक्रियायामीश्वरस्य सिसृक्षापि कारणत्वेनोपपादिता वर्तते – *प्राणिनां भोगभूतये महेश्वरसिसृक्षान्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति।...केनचिदनभिभूतत्वाद्देदीप्यमानस्तिष्ठति* (प्र.पा.भा.,सन् १९९७,पृ.१२७) इति। एतत्सिद्धान्तमात्मसात्कृत्य भाष्यकारो वात्स्यायनः कथयति – *पुरुषकर्मादिनिमितो भूतसर्गः, कर्महेतवो दोषाः प्रवृत्तिश्च, स्वगुणविशिष्टाश्चेतनाः, असदुत्पद्यते उत्पन्नं निरुध्यत इति योगानाम्,* (न्यायदर्शनम्,सन् १९८६,पृ.३४) इति। अत्र वात्स्यायनोक्तयोगानामिति पदं वैशेषिकाणामित्यर्थकम्। अत्रायं भावः – पृथ्व्यप्तेजोवायुराकाशात्मिकैषा सृष्टिः पुरुषकर्मनिमित्तिकेति यावत्। कर्महेतव ईर्ष्या–असूया–प्रेम–लोभादिदोषाः, शरीरोत्पन्ना हिंसा–स्तेय–मैथुन–दोषाः, वागुत्पन्ना मृषा–कटुवचन–निष्प्रयोजनवार्तादयः, एवमेव मानसिकदोषा द्रोहपरद्रव्यापहरणनास्तिकस्वभावादयः। चेतनस्तु स्वगुणेष्वद्वितीयो विशिष्टश्च। असदुत्पद्यते परन्तु नित्यवस्तु कदापि नोत्पद्यते। अतः पुरुषेच्छया

परमाणुतो जगदुत्पद्यते। प्रशस्तपादाचार्यस्य स्वविरचितप्रशस्तपादभाष्ये सृष्टिविषयकमाभाणकमस्ति यत् तथा च दर्शनयोरनयोः सृष्टिसंहारप्रक्रियायां समानता दृश्यते न तु पृथक्तेति द्वितीयं प्रमाणमपि स्पष्टम्। एतेन ज्ञायते यद् भूतसर्गः पुरुषकर्मादिनिमित्त इति। अतोऽस्मिन् सृष्टिसंहारप्रक्रियाविषयेऽनयोर्न्यायवैशेषिकयोः साम्यमतं दृश्यते।

**आत्मा**

न्यायवैशेषिकदर्शनप्रतिपादितस्याऽऽत्मविषयकसिद्धान्तेऽपि समानता वर्तते, य आत्मा सर्वेषामात्मवादिदर्शनानां कृते महत्त्वपूर्णो वर्तते। पौरस्त्यपरम्परायामात्मचिन्तनस्यापरिहार्यता सर्वैरपि ज्ञायत एव। अत एवात्मतत्त्वं पौरस्त्यचिन्तस्य मेरुदण्ड इत्युच्यते। तत्र गौतमप्रणीते न्यायसूत्रे प्रमाणनिरूपणानन्तरं प्रमेयाणामुद्देशः कृतो वर्तते। तत्र ह्यात्मेच्छादिभिर्लिङ्गैरनुमीयत इति स्पष्टं वक्ति सूत्रकारो गौतमः। यथा – *इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्* (न्या.सू.१।१।१०)। एवमेव भाष्यकारो वात्स्यायनो गौतममतमङ्गीकृत्य न्यायभाष्ये आत्माऽनुमेयो न तु प्रत्यक्ष इत्युल्लिखति – *तत्रात्मा तावत्प्रत्यक्षतो न गृह्यते स किमाप्तोपदेशमात्रादेव प्रतिपद्यत इति ? नेत्युच्यते – अनुमानाच्च प्रतिपत्तव्य इति* (न्यायदर्शनम्,सन् १९८६,पृ.२०)। परमत्र आनन्तरकालिकैः केशवमिश्र–विश्वनाथप्रभृतिभि र्नैयायिकैरात्मनः प्रत्यक्षत्वमपि निगदितं वर्तते।

एवमेव काणादीयवैशेषिकदर्शने आत्मनः सिद्धिप्रसङ्गे महर्षिकणादः *प्रसिद्धा इन्द्रियार्थाः* (वै. सू.३।१।१) इत्युक्त्वा इन्द्रियाणामर्थानाञ्च प्रसिद्धत्वं स्पष्टीकरोति। इन्द्रियाणामर्थानाञ्च प्रसिद्ध्यावश्यमेव किञ्चनान्यद्वस्त्वपि वर्तत इति ज्ञायते। यतोहि साधनानि खलु इन्द्रियाणि स्वयं न किमपि कर्तुं समर्था भवन्ति। अतः कस्मैचन कार्याय कश्चनाधिष्ठाता त्वपेक्षितो भवति। उक्तञ्च कणादसूत्रे यथा – *इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः* (वै.सू.३।१।२) इति। पूर्वोक्तमतं प्रष्टीकर्तुं प्रशस्तपादाचार्यः प्रशस्तपादभाष्ये वक्ति यथा – तस्य सौक्ष्म्यादप्रत्यक्षत्वे सति करणैः शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते (प्र.पा.भा.,सन् १९९७,पृ.१६८)। वैशेषिकदर्शने आत्मनः सिद्ध्यर्थं *प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि* (वै.सू.३।२।४) इत्युदाहृतम्। अथ च *तत्रात्मा मनश्चाप्रत्यक्षे* (वै.सू.८।१।२) इत्यपि सूत्रमात्मानुमेय इति सिद्धान्तं प्रमाणीकरोति। एवमुपर्युक्तानेकप्रमाणवचनाद् वैशेषिकदर्शने आत्मानुमेयो न तु प्रत्यक्षः। एवावता उभयोरपि न्यायवैशेषिकदर्शनयोर्ज्ञानादिभिर्लिङ्गैरात्मा साध्यते। तत्र जीवात्मपरमात्मभेदेनात्मा द्विविधः। परमात्मा सर्वज्ञः, जगन्निमित्तकारणीभूतः, नित्यः, विभुश्चेज्जीवात्मानोऽनन्ताः, बुद्धिसुखदुःखादिगुणविशिष्टाः, ज्ञानाश्रयाः, शरीरेन्द्रियाद्यतिरिक्ताः, नित्याः, विभवश्चेति।

**परमाणुवादः**

पौरस्त्यदर्शने जैनबौद्धमीमांसादर्शनानि परमाणुवादं स्वीकुर्वन्ति तथापि विद्वत्समाजे वस्तुतो न्यायवैशेषिके परमाणुवादिदर्शने। न्यायदर्शने निरवयवपरीक्षाया विहितत्वाद् वैशेषिकोक्तपरमाण्वादिकं नैयायिकाभिमतमेव वर्तते। ईश्वरः परमाणुभिर्जीवानां धर्माधर्मवशाज्जगत् सृजतीति दृढो विश्वासो न्यायवैशेषिकदर्शनयोर्वर्तते। अतः परमाणुवादिमते परमाणुरेव जगतो मूलकारणम्। तत्र वैशेषिके दर्शने

पृथिव्यप्तेजोवायवो नित्याऽनित्याश्च वर्तन्ते। यथा सांख्यदर्शनं जगतो मूलकारणं प्रकृतिरस्तीति प्रतिपादयति, तद्विपरीतं न्यायवैशेषिकदर्शने पृथिव्यादिचतुर्णां परमाणवो जगतो मूलकारणमिति प्रतिपादयतः। एनमेव विषयं प्रतिपादयन् वैशेषिकसूत्रोपस्कारग्रन्थकर्ता शंकरमिश्रो नित्यपदार्थान् प्रतिपादयति यथा – *सदकारणवन्नित्यम्* (वै.सू.४।१।१) इति। अकारणवन्नित्यमित्युच्यमाने प्रागभावेऽतिव्याप्तिरतः सदित्यपि वक्तव्यम्। अर्थाद् यस्य वस्तुनः कारणं न भवति, तत्सद्वस्तु नित्यमिति। नित्यास्तु पृथिव्यादिचतुर्णां परमाणवः। यथा कारिकावल्यां विश्वनाथः पृथिव्यादिपरमाणुविषयेऽवादीत्। तत्रादौ पृथिवीविषये यथा – *नित्याऽनित्या च सा द्वेधा नित्या स्यादणुलक्षणा* (न्यायसिद्धान्तमुक्तावली,२०६३,पृ.११३) इति। एवं क्रमेण मुक्तावल्यामेव जलतेजोवायुपरमाणुविषयेऽपि ज्ञेयम्। तर्हि परमाणोः प्रमाणत्वं कथं सिद्ध्यतीति चेदुच्यते अपरसूत्रमाध्यमेन यथा – *तस्य कार्यं लिङ्गम्* (वै.सू.४।१।२) इति। अर्थाद् घटादिकार्यमेव लिङ्गमित्यर्थः। पृथिव्यादिचतुर्णां परमाणुस्वरूपनित्यद्रव्यमेव परमाणुतो निर्मितं जगदिति। यत्किमपि कार्यमुपादानकारणमन्तरा नैवोत्पद्यते। यथा घटादिकार्यं कपालरूपोपादानकारणतो जायते। तथैव यावदुत्पन्नपदार्थानां कारणत्वमवश्यमेव स्वीकर्तव्यं भवति। तच्च कारणं परमाणुरिति ज्ञेयम्। परमाणोः स्वरूपं श्रीमद्भागवते यथा –

*अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः।*
*जालार्करश्म्यवगतः खमेवानुपतन्नगात्* ॥ (श्रीमद्भागवतम्, ३।११।५)

तेषां पदार्थानां मूलकारणन्तु परमाणुरिति वक्तव्यम्। एवमेव परमाणौ रूपादिगुणा अपि भवन्तीति प्रसङ्गेऽपरसूत्रं यथा – *कारणभावात् कार्यभावः* (वै.सू.४।१।२) इति। न्यायवैशेषिकोभयदर्शने कारणगुणाः कार्यगुणानारभन्ते इति सिद्धान्तो वर्तते। यथा च वैशेषिकसूत्रम् – *द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्* (वै.सू.१।१।१०), *कारणगुणपूर्वकः कार्यगुणो दृष्टः* (वै.सू.२।१।२४) इति। अस्मिन्नये कारणानां नवीनसंयोगतः कार्यस्यारम्भ उत्पत्तिर्वा भवति न तु कार्यं कारणे पूर्वमेव विद्यमानं भवति। यथा मृत्तिकातो घट उत्पद्यते, परं घटो मृत्तिकासु पूर्वमेव न विद्यते। अतः कार्यं खलु कारणात् सर्वथा भिन्नमिति स्पष्टम्। अस्मिन् सन्दर्भे न्यायवैशेषिकोभयदर्शनयोः समाना दृष्टिर्वर्तते।

**आरम्भवादः**

आरम्भवादो न्यायवैशेषिकोभयदर्शनयोः कारणकार्यसम्बन्धविषयकः प्रमुखसिद्धान्तो वर्तते। आरम्भवादस्यापरं नामासत्कार्य इत्यप्युच्यते। असदिति वस्तूनामभावः। कार्यमुत्पत्तेः पूर्वमसद् भवति चेदुत्पत्त्यनन्तरं सद् भवति। कारणे कार्यस्य पूर्वसत्त्वं न स्वीक्रियते। वैशेषिकदर्शनानुसारं यत्कार्यं पूर्वं नासीत्तत्कारणसामग्र्योत्पद्यते, तदसत्कार्यमित्युच्यते। उत्पन्नकार्यस्यानित्यत्वन्तु सिद्धं विनश्यति च ध्रुवम्। एतदेव मतं न्यायदर्शनेनापि स्वीकृतत्वादसत्कार्यवादविषये आरम्भवादविषये वा दर्शनयोरुभयोः साम्यं विद्यते। पूर्वमविद्यमानम् (असत् कार्यं) कारणसामग्र्या उत्पद्यते। तच्चोत्पन्नमनित्यं कार्यमवश्यं विनश्यति च। यथा कुलालः कपालदण्डादिसामग्र्या 'घटं कर्तुमारभे' इत्येव वदति, स च घटः कदाचिद् विनश्यत्येव। एवञ्चायम् 'आरम्भवादः' उभयोरपि दर्शनयोः समान एव।

**अवयवाः**

उभयत्राप्यवयवः स्वीकृतो विश्लेषितश्च लभ्येत। वस्तुतः प्रमाणशास्त्रपदेन न्यायशास्त्रमेवागवम्यतेऽथाप् यवयवतत्त्वन्तूभयत्रापि सूत्रत एव स्वीकृतम्, यद्यपि वैशेषिकसूत्रे स्पष्टतो नास्ति लिखितन्तथापि प्रशस्तदेवेन तेऽवयवाः स्पष्टत उक्त्वा विश्लेषिताश्च। यथा न्यायशास्त्रे परार्थानुमाने *प्रतिज्ञाहेतूदाहरणोपनयनिगमना न्यवयवाः* (न्या.सू.१।१।३९) इति गौतमसूत्रानुसारं पञ्चावयवा निर्दिष्टा वर्तन्ते, तथैव वैशेषिकदर्शनेऽपि परार्थानुमाने यथा *अस्येदं कार्यकारणसम्बन्धाश्चावयवाद् भवति* (वै.सू.९।२।२) इति कणादसूत्रमाध्यमेन पञ्चावयवा एवोपदिष्टा विद्यन्ते। शब्दतः पृथक्त्वेऽप्यर्थतः समान एवार्थः पञ्चावयवानामुभयोर्दर्शनयोः। एतानेव पञ्चावयवानङ्गीकृत्य प्रशस्तदेवः प्रशस्तपादभाष्ये प्रतिज्ञा–अपदेश–निदर्शन–अनुसन्धान–प्रत्याम्नायान् विवेचयति। यथा गौतमेन न्यायदर्शने अवयवाः प्रतिपादितास्तथैव शङ्करमिश्रेण तद्रीत्यैव नव्यन्यायशैलीमनुसृत्य वैशेषिकसूत्रोपस्कारग्रन्थे पञ्चावयवाः प्रतिपादिताः। अत उभयोः पञ्चावयवविषयकप्रतिपादनशैल्यां समानत्वाद्विषयेऽस्मिन्नप्युभयोर्दर्र्शनयोः साम्यमिति स्फुटम्।

**अपवर्गः (मोक्षः)**

पौरस्त्यदर्शनेषु प्रत्येकं दर्शनस्य मुख्यं लक्ष्यं दुःखात् परममुक्तिरिति तथापि प्रत्येकं दर्शने मोक्षस्य रूपाणि परिभाषा च भिन्नानि मन्यन्ते। यद्यपि लौकिकवस्तूनि रमणीया इव दृश्यन्ते तथापि ते दुःखदा एव भवन्ति। न्यायदर्शने प्रमाणप्रमेयादिषोडशपदार्थतत्त्वज्ञाने सति निःश्रेयसमिति तु प्रारम्भ एव सूत्रकारो गौतम अवोचत्। निःश्रेयसस्यैवापरं नामापवर्गः। अपवर्गश्च मुक्तिरित्यनर्थान्तरम्। तत्र गौतमेन दुःखस्यात्यन्ताभाव एवापवर्ग इत्युक्तं यथा – *तदत्यन्तविमोक्षोऽपवर्गः* (न्या.सू.१।१।२२) इति। एकविंशतिविधदुःखानामत्यन्ताभाव एव मुक्तिरिति ज्ञेयम्। तत्पश्चादेव गृहीतं जन्म नश्यति चेत् पुनर्जन्म च जायते। उक्तञ्च वात्स्यायनेन भाष्ये – *उपात्तस्य जन्मनो हानम्, अन्यस्य चानुपादानम्* (न्यायदर्शनम्,सन् १९८६,पृ.२७) इति। न्याय–वैशेषिक–दर्शनयोर्मतं वर्तते यत् सुखन्तु दुःखात् परममुक्तिरेव। ऋते ज्ञानान्न मुक्तिरिति कथनात् सर्वेषु किल दर्शनेषु साधनं ज्ञानमेव तच्च मुक्तिप्रधानं साधनमस्ति। ज्ञानेन मुक्तिः सिद्ध्यति तर्हि सा च मुक्तिर्ज्ञानप्राप्त्यनन्तरमेव उताहो बहोः कालानन्तरमिति चेद् सूत्रमिदं कथयति – *दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः* (न्या.सू.१।१।२) इति। सूत्रार्थो यथा – दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानेषु क्रमश उत्तरोत्तरनाशात् पूर्वपूर्वनाशस्तदनन्तरमेवापवर्गप्राप्तिः। वस्तुतो दुःखहेतुर्जन्म, जन्महेतुः प्रवृत्तिः, प्रवृत्तिहेतुर्दोषः, दोषहेतुर्मिथ्याज्ञानम्। कारणे नष्टे सति कार्यनाशोऽनिवार्य इति स्वाभाविकः सिद्धान्तः। एतत्सिद्धान्तानुसारं यदि मिथ्याज्ञानं नश्यति चेद् दोषा नश्यन्ति, दोषेषु नष्टेषु सत्सु प्रवृत्तिर्नश्यति, प्रवृत्तौ नष्टायां सत्यां जन्म नश्यति, जन्मनि नाशे सति दुःखनाशो भवति। सति च दुःखनाशे मोक्षो भवति। एनमेव विषयं पूर्णतः स्वीकृत्यैव शङ्करमिश्रेण निजनिर्मितवैशेषिकसूत्रोपस्कारग्रन्थे पूर्वोक्तदुःखजन्म... इति सूत्रव्याख्यानक्रमे अयमेव भावो व्यक्तीकृतोऽस्ति। यथा – इदमत्राकूतम् – *योगबलेनात्मसाक्षात्कारे सति तेन च समवासनमिथ्याज्ञाने ध्वस्ते तन्निबन्धनानां रागद्वेषमोहानां दोषाणामपायात् प्रवृत्तेरपाये तन्निबन्धनस्य जन्मनोऽपाये तन्निबन्धनस्य दुःखस्यापाय इति तावद्वस्तुगतिः* (वैशेषिकसूत्रोपस्कारः,सन् १९६९,सू.५।२।१८) इति। प्रमाणेनानेन ज्ञायते यन्न्यायदर्शनप्र

तिपादितमुक्तिविषयको विचारो वैशेषिकदर्शनस्याप्यभिमतोऽस्ति। परं भासर्वज्ञस्तु नैयायिकानामन्येषां मोक्षविषयकं चिन्तनमादायादौ *समस्तात्मगुणोच्छेदे संहारावस्थायामाकाशवदात्मनोऽत्यन्तावस्थानं मोक्षः* (न्यायसारः,सन् २००४,पृ.५९४) इति निगद्य तत्र कारणत्वेन सुखदुःखयोरविनाभावित्वादिकं सन्दर्श्य तत्खण्डनपुरस्सरमागमादपवर्गे सुखोपभोगसिद्धिर्जायत इति ब्रवीति – *दुःखे सति सुखस्यासम्भवात्कण्टकादिपरिहारोऽपि सुखोपभोगार्थ एवेत्यसमो दृष्टान्तः। कुतो मुक्तस्य सुखोपभोगसिद्धिरिति चेद्, आगमात्।... न दुःखाभावे* (न्यायसारः,सन् २००४,पृ.५९५) इति। अतो पृथङ्नयस्वीकृतो नैयायिकभासर्वज्ञो नैयायिकेषु भिन्नः। वस्तुगत्या तु न्यायशास्त्राभिमतमोक्षावस्थायां सुखानन्दादिकं भवतीति तु शङ्कराचार्योक्त्यापि सिद्ध्यति। कस्मिँश्चित्समये तीर्थं भ्रममाणं जगद्गुरुशङ्कराचार्यं कश्चन नैयायिक एकः पृच्छति – यदि भवान् ज्ञातास्ति चेत् काणादगौतमीयमुक्तिगता भिन्नता वाच्यताम्, नो चेद् भवत्सर्वज्ञत्वमपगतं भवेदित्यत्र आचार्यः शङ्करो ब्रवीति – काणादमते सर्वगुणोच्छेदो मुक्तिश्चेन्नैयायिकमते तु सानन्दसंविन्मुक्तिरिति। श्लोकश्च यथा –

तत्रापि नैयायिक आत्तगर्वः कणादपक्षाच्चरणाक्षपक्षे।
मुक्तेर्विशेषं वद सर्वविच्चेन्नो चेत् प्रतिज्ञां त्यज सर्ववित्त्वे ॥
अत्यन्तनाशे गुणसङ्गतेर्या स्थितिर्नभोवत् कणभक्षपक्षे।
मुक्तिस्त्वदीये चरणाक्षपक्षे सानन्दसंवित्सहिता विमुक्तिः ॥

(फणिभूषणः, सन् १९६८, पृ.१४)

न्यायदर्शनप्रतिपादितापवर्गविषयकचिन्तने वैशेषिकदर्शनेऽपि साम्यमवलोक्यते। वैशेषिकदर्शने न्यायदर्शनवदपवर्गस्वरूपप्रतिपादनात्पूर्वम् *आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे* (वै.सू.५।२।१५) इत्यनेन सूत्रेण सुखदुःखयोः स्वरूपविश्लेषणम्, *तदनारम्भे आत्मस्थे मनसि शरीरस्य दुःखाभावः स योगः* (वै. सू.५।२।१६) इति सूत्रेण चात्मनि सुखदुःखाभावप्रतिपादनम्, अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि (वै.सू.५।२।१७) इति सूत्रेण चात्मनः संयोगाभावनिरूपणं विहितम्। *तदभावे संयोगाभावोऽप्रादुर्भावश्च मोक्षः* (वै.सू.५।२।१८) इति सूत्रस्यार्थो शरीरे मनःकर्माभावे आत्मनि स्वतः शरीरसंयोगो न भवतीति, पुनरात्मनो नवीनशरीरान्तरप्रवेशानर्हत्वात् पुनर्जन्म न भवति। फलतो जन्मनोऽभावे सति सांसारिकसुखदुःखात्यन्ताभावः, सुखदुःखात्यन्ताभावे मोक्ष इति वैशेषिकाणां सिद्धान्तो वर्तते। नैयायिकेषु भासर्वज्ञ एव मोक्षावस्थायामपि सुखानुभूतिर्भवतीति मनुते। वैशेषिकमते तु न तथा। पूर्वोक्तन्यायसूत्रन्यायभाष्यप्रभृतिग्रन्थेषु सर्वथा सुखाभाव एव मोक्ष इति प्रतिपादितं वर्तते। यथा – *नित्यं सुखमात्मनो महत्त्ववन्मोक्षे व्यज्यते, तेनाभिव्यक्तेनात्यन्तं विमुक्तं सुखीभवतीति केचिन्मन्यन्ते, तेषां प्रमाणाभावादनुपपत्तिः, न प्रत्यक्षं नानुमानं नागमो वा विद्यते नित्यं सुखमात्मनो महत्त्ववन्मोक्षेऽभिव्यज्यत इति* (न्यायदर्शनम्,सन् १९८६,पृ.२७)। तदेतद्भाष्यं स्वरूपेणैव मुक्तौ सुखसंवेदनाभावप्रतिपादकमस्ति। एवञ्च मुक्तौ दर्शनयोरनयोः साम्यमेव।

**ईश्वरः**

पौरस्त्यदर्शनपरम्परायामीश्वरः प्राधान्येन प्रतिपाद्यते। तत्रापि कतिपयास्तिकदर्शनेष्वीश्वरः प्राधान्येन

कतिपयेषु च प्रासङ्गिकतया प्रतिपाद्यते। तत्र वैदिकावैदिकदर्शनेष्वपि निरीश्वरवादित्वं सेश्वरवादित्वञ्च दृश्यते। एवञ्च प्राच्यदर्शनेषु निरीश्वरवादिमतं खण्डयित्वा सेश्वरतत्त्वप्रतिपादनार्थं विशेषतो न्यायदर्शनस्य महती भूमिका दृश्यते। तत्रापि उदयनाचार्यकृतन्यायकुसुमाञ्जलिग्रन्थस्तु ख्यातो पौरस्त्यदर्शने। आन्वीक्षिकीदर्शने तु *ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्* (न्या.सू.४।१।१९) इत्युक्त्वा स्पष्टत ईश्वरः कथितः। सूत्रस्यामुष्याशयो वर्तते यत् पुरुषेण कस्मैचन प्रयोजनाय यत्कार्यं करोति, तेन कृतं कार्यं कृतः प्रयत्नश्च पूर्णो न भवति। अतो मनुष्यकृतकर्मणां फलं परवशं भवति। इदमेव कर्मफलमीश्वरवशम्, सर्वसृष्टेः कारणञ्चमीश्वर इति। भाष्यकारो वात्स्यायनोऽपि न्यायभाष्ये ईश्वरं स्पष्टतया स्वीकृत्योक्तवान् – *गुणविशिष्टमात्मान्तरकल्पमीश्वरः तस्यात्मकल्पात्कल्पान्तरानुपपत्तिः* (न्या.सू.४।१।१९) अर्थादीश्वरः परमात्मा नित्यज्ञानकामप्रयत्नादिविशेषगुणसम्पन्नः पुनश्चेश्वरो द्रष्टा, स्रष्टा, सर्वज्ञाता इत्युच्यते। य ईश्वरः सर्वविधवस्तूनि द्रष्टुं शक्नोति, सर्वपदार्थविदित्याद्यनन्तनामभिः स्तुन्वन्ति। इत्थं कतिपयविषयेषु वैषम्यसत्त्वेऽपि, बहुविषयेषु न्यायवैशेषिकयोः साम्यदर्शनात्, अनयोः समानतन्त्रत्वमपि निर्विवादमेव।

एवञ्चेश्वरप्रतिपादनप्रसङ्गे महर्षिगौतमप्रणीते न्यायसूत्रे यथेश्वरः स्पष्टत उक्तो वर्तते न तथा वैशेषिकसूत्रे इति चेन्न, महर्षिकणादो वैशेषिकसूत्रमाध्यमेनैवेश्वरस्यास्तित्वस्य प्रतिपादितत्वात्। यथा –*तद्वचनादाम्नायस्य प्रामाण्यम्* (वै.सू.१।१।३), *संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम्, प्रत्यक्षप्रवृत्तत्वात् संज्ञाकर्मणः* (वै.सू.२।१।१८,१९), *न तावदेव भाष्ये च तल्लभ्यते...तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव* (प्र.पा.भा.,सन् १९९७,पृ.१८) इति। इदमत्र ध्येयम् – यः पुरुषो यं कमपि पदार्थं प्रत्यक्षीकरोति, स एव पदार्थस्य तस्य नामकरणं सम्पादयति अथ च पदार्थं निर्मातुं विनष्टुञ्च प्रभवति। जगत्यस्मिन् यान्यसङ्ख्यद्रव्याणि प्रत्यक्षतया नावलोकितानि तेषां नामकरणं सृष्टिञ्च कर्तुं न वयं शक्नुमो नितरामतोऽस्मद्विशिष्टो यो वर्तते, स ईश्वरनाम्ना व्यपदिश्यते। एतावता चेश्वरसिद्धौ च सत्यां तन्निर्मितवेदा अपि प्रामाण्यमिति निष्कर्षः। राग–अज्ञान–अहङ्कारादिदोषपीडितः पुरुषोऽसत्यं निरर्थकं च वचनं ब्रवीति, परन्तु ईश्वरे तादृशदोषाणामभावात् सः कथं निरर्थकवाक्यानि वक्तुं शक्नोति ? उक्तञ्च –

रागज्ञानादिभिर्वक्ता ग्रस्तत्वादनृतं वदेत्।
ते चेश्वरे न विद्यन्ते स बूरयात् कथमन्यथा ॥ (अनुश्रुतितो लब्धम्)

एवमेव प्रशस्तपादभाष्यग्रन्थस्य मङ्गलाचरणे स्वयं प्रशस्तदेवः प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः... (प्र.पा.भा.,सन् १९९७,पृ.१) अथ च *तच्च ईश्वरचोदनाभिव्यक्ताद् धर्मादेव* (प्र.पा.भा.,सन् १९९७,पृ.१८) इत्युक्तत्वाच्च स्पष्टम्। वैशेषिकदर्शनगतयोः पूर्वोक्तसृष्टिविनाशप्रक्रिययोश्च सकलभुवनपतेर्महेश्वरम्... इतिवाक्ये महेश्वरशब्दस्य प्रयोगादीश्वरवादीति स्पष्टम्। तथा च न्यायकन्दली–न्यायलीलावती–सेतुटीका इत्याद्यनेकटीकादिषु भाष्येषु चेश्वरस्य बहुवारं प्रयुज्यत्वादेतयोर्दर्शनयोः साम्यं स्पष्टम्। न्यायदर्शने ईश्वरः सर्वज्ञः, कर्तुमकर्तुमन्यथाकर्तुं समर्थः, जगत्कर्ता, जगद्रक्षकः, स्रष्टेति बहुभिर्नामभिः सम्बोध्यते। अत ईश्वरविषये उभयोर्दर्शनयोर्दृष्टिः समाना एव।

## निष्कर्षः

पौरस्त्यदार्शनिकी परम्परा अतिप्राचीना, अतिविपुला च वर्तते। दार्शनिकक्षेत्रेऽध्यात्मवादो भौतिकवादश्चेति सिद्धान्तौ प्रसिद्धौ। दृश्यते = ज्ञायते अनेन वस्तुतत्त्वमिति व्युत्पत्त्या यतो जगद्विषयकात्मविषयकयथार्थतत्त्वं ज्ञायते तदेव दर्शनम्। दृष्टिरिति व्युत्पत्त्या तु ज्ञानमेव दर्शनम्। परमधिकांशतः प्रथम एवार्थे दर्शनपदं प्रयुज्यते। तच्च दर्शनं वैदिकावैदिकभेदाद् द्विधा विभज्यते। तत्र सांख्य–योग–न्याय–वैशेषिक–पूर्वोत्तरमीमांसासु न्यायदर्शनमिदं महत्त्वपूर्णमिति तु प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणामित्यादिवचनरचनेनापि स्पष्टीभवति। तत्र न्यायो नाम प्रमाणैरर्थपरीक्षणम्। मानाधीना मेयसिद्धिरिति हि सिद्धान्तो नैयायिकानाम्। अतः खलु न्यायशास्त्रं प्रमाणशास्त्रं हेतुशास्त्रमित्यादिनाम्नापि ज्ञायते। दर्शनेऽस्मिन् प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्मोक्षो लभ्यत इति सिद्धान्तितमस्ति। न्यायशास्त्रद्वारा व्याकरणशास्त्रं तदनन्तरं साहित्य–मीमांसा–वेदान्तादिशास्त्राणि च प्रवृद्धानि। तत्र खलु काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमित्यभियु क्तोक्तिः प्रमाणायते। स्वयमन्नम्भट्टः स्वविरचिते तर्कसंग्रहग्रन्थे ब्रूते – अधीतव्याकरणकाव्यकोषोऽनधी तन्यायशास्त्रो बाल इति। पौरस्त्यवाङ्मये न्यायशास्त्रं वादविद्या, हेतुविद्या, तर्कशास्त्रम्, आन्वीक्षिकीविद्या इत्यादिभिर्नामभिर्व्यवह्रियते।

एवमेव वैशेषिकदर्शने सर्वविधैहिकामुष्मिकाभीष्टानां निःश्रेयसस्य साधनत्वेन धर्मः प्रकल्पितो वर्तते। प्रवृत्तिलक्षणधर्मेण ऐहिकसुखस्य स्वर्गादिपारलौकिकसुखस्य च प्राप्तिर्भवति चेन्निवृत्तिलक्षणविशेषधर्मेण द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं जायते। तदनन्तरं मोक्षो लभ्यते। वैशेषिकदर्शनमाध्यात्मिकदर्शनं सदपि भौतिकवादिदर्शनमप्यस्ति। दर्शनमिदं भौतिकवादस्य समीपवर्तित्वात् कणादप्रतिपादितसप्तपदार्थानां भौतिकात्मकः स्वभावोऽस्ति। पदार्थचिन्तनविषये गौतमप्रणीतं न्यायशास्त्रमपि वैशेषिकदर्शनस्य पदानुसारीति मन्यते। बहुषु विषयेषु दर्शनयोरनयोर्मतभेदे सत्यप्यालेखेऽस्मिन् न्यायवैशेषिकोभयदर्शनगत साम्यविषया एवात्र प्रदर्शिताः। न्यायवैशिषिकदर्शनयोरेकस्य प्रमाणशास्त्रत्वेन अपरस्य च प्रमेयशास्त्रत्वेन प्रसिद्धत्वेऽपि बहुषु विषयेषु साम्यसत्त्वात् तयोः समानतन्त्रत्वं सर्वसम्मतमिति दिक्।

## सन्दर्भसूची

कपिलः (सन् १९७७). *सांख्यसूत्रम्.* रामशंकरभट्टाचार्यः (सम्पादकः). वाराणसी : भारतीय–विद्या–प्रकाशनम्।

गौतमः (सन् १९८६). *न्यायदर्शनम्.* वात्स्यायनभाष्यसहितम्, विश्वनाथकृतवृत्तिसहितम्, वाराणसी : सुधी प्रकाशन।

तर्कवागीश, फणिभूषण. (सन् १९६८). *न्यायपरिचय.* (अनु. डा.किशोरनाथ झा). वाराणसी : चौखम्बा विद्याभवन।

देवाचार्यः, प्रशस्तः (सन् १९६६), *प्रशस्तपादभाष्यम्.* ढुण्डिराजः शास्त्री, भाष्यव्याख्याकारः) नारायणमिश्रः (वैशेषिकसूत्रव्याख्याकारः), वाराणसी : चौखम्बा–संस्कृत–सिरिज–आफिस।

पराशरः (२०५८) *विष्णुपुराणम्*:. (हिन्दी–अनुवादसहित),चौबीसवाँ संस्करण. गोरखपुर : गीताप्रेस।

पाणिनिः (सन् २०००). *अष्टाध्यायी,* प्रो.गोपालदत्तपाण्डेयः(सम्पा.). वाराणसी : चौखम्बा–सुरभारती–प्रकाशनम्।

प्रशस्तदेवाचार्य. (२०३७) *प्रशस्तपादभाष्य.* वाराणसी : चौखम्बा संस्कृत संस्थान।

प्रशस्तपादाचार्यः ¬(सन् १९९७). *प्रशस्तपादभाष्यम्* (श्रीधराचार्यकृतन्यायकन्दलीयुतम्), (द्वितीयं संस्करणम्), श्रीदुर्गानन्दझा (सम्पादकः, हिन्दीव्याख्याकारः). वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालयः।

बादरायणः (२०६२). *वेदान्तदर्शनम्* (ब्रह्मसूत्रम्), हिन्दीव्याख्यासहितम् (द्वाविंशतिसंस्करणम्), हरिकृष्णदासः गोयन्दका (व्याख्या.). गोरखपुर : गीताप्रेस।

भट्टाचार्यः, विश्वनाथः (२०६३). *न्यायसिद्धान्तमुक्तावली,* किरणावलीसमाख्यव्याख्योपेता, श्रीकृष्णवल्लभाचार्यः. वाराणसी : चौखम्बा संस्कृत संस्थान।

भासर्वज्ञः (सन् २००४). *न्यायसारः न्यायभूषणयुतः.* सम्पा. स्वामी योगीन्द्रानन्दः, पुनर्मुद्रित संस्करण. वाराणसी : चौखम्बा विद्याभवन।

मिश्रः, शङ्करः (सन् १९६९). *वैशेषिकसूत्रोपस्कारः.* ढुण्डिराज शास्त्री(व्याख्या.) नारायणमिश्रः (सम्पा.), (द्वितीयं संस्करणम्). वाराणसी : चौखम्बा संस्कृत सिरिज अफिस।

वल्लभाचार्यः (सन् १९९१). *न्यायलीलावती* (श्रीभगीरथठक्कुरकृतविवृतिसनाथेन श्रीवर्धमानोपाध्यायकृतप्रकाशेन समुद्भासिता श्रीशङ्करमिश्ररचितकण्ठाभरणेन च समन्विता), द्वितीयं संस्करणम्. वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।

सहगलः, कुलदीपकुमारः (सन् २०१०). *द्रव्यकिरणावल्याः विश्लेषणात्मकमध्ययनम्* (अप्रकाशितशोधप्रबन्धः). नवदेहली : श्रीलालबहादुरराष्ट्रियसंस्कृतविद्यापीठ।